आदर्शप्रश्नपत्रम्

# HPBOSE DHARAMSHALA

शिक्षा-सत्र- 2026-2027

कक्षा दशमी

विषयः संस्कृतम्

समयः होरात्रयम् | पूर्णांकाः 80

## खण्ड 'क'

## बहुविकल्पात्मक-प्रश्नाः

अधोलिखित-षोडश-प्रश्नानाम् उत्तराणि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत। 1×16=16

प्रश्न-1. शेमुषी (द्वितीयो-भागः) इत्यस्य चतुर्थः पाठः कः?

(A) जननी तुल्यवत्सला (B) सुभाषितानि (C) सौहार्दं प्रकृतेः शोभा (D) विचित्रः साक्षी

प्रश्न-2. का बलवती भवति?

(A) भामिनी (B) बुद्धिः (C) बुद्धिमती (D) बृद्धिः

प्रश्न-3. भृशं दूषितं किं जातम्?

(A) कालायसचक्रम् (B) चाकचिक्यजालम् (C) वायुमण्डलम् (D) जलम्

प्रश्न-4. बकः ……………… इति नाम्नाऽपि ज्ञायते।

(A) मेध्यामेध्यभक्षकः (B) स्थितप्रज्ञः (C) आत्मश्लाघाहीनः (D) पदनिर्लिप्तः

प्रश्न-5. ‘सरसः’ इत्यस्य शब्दस्य कोऽर्थः?

(A) बकः (B) मीनस्य (C) कमलस्य (D) तडागस्य

प्रश्न-6. सर्वं सम्भाषणं <u>शृण्वन्</u> एव अहम् अत्रागच्छम्।

(A) श्रु+शतृ (B) श्रु+इन् (C) शृण्वन्+क्त (D) श्रु+णिनि

प्रश्न-7. राहुल: प्रातर्भ्रमणाय <u>5:45</u> उद्यानं गच्छति।

(A) षड्वादने (B) सार्ध-षड्वादने (C) पादोन-षड्वादने (D) पादोन-पञ्चवादने

प्रश्न-8. अम्भोदा बहवो हि सन्ति गगने <u>सर्वेऽपि</u> नैतादृशाः।

(A) सर्वः+अपि (B) सर्वे+ऽपि (C) सर्वे+अपि (D) सर्वः+ऽपि

प्रश्न-9. लक्ष्म्या पुस्तकानि पठ्यन्ते।

(A) लक्ष्म्या पुस्तकानि पठ्यन्ते। (B) लक्ष्मी पुस्तकानि पठति।

(C) लक्ष्मी पुस्तकानि पठन्ति। (D) लक्ष्मी पुस्तकं पठति।

प्रश्न-10. <u>पितरि</u> इत्यस्य पद-परिचयम्-

(A) पितृ शब्दः, तृतीया विभक्तिः, एकवचनम्। (B) पितृ शब्दः, षष्ठी विभक्तिः, एकवचनम्।

(C) पितृ शब्दः, सप्तमी विभक्तिः, एकवचनम्। (D) पितृ शब्दः, चतुर्थी विभक्तिः, एकवचनम्।

प्रश्न-11. <u>सेवन्ते</u> इत्यस्य पद-परिचयम्-

(A) सेव् धातुः, लट्लकारः, प्रथम-पुरुषः, बहुवचनम्। (B) सेव् धातुः, लृट्लकारः, प्रथम-पुरुषः, बहुवचनम्।

(C) सेव् धातुः, लट्लकारः, प्रथम-पुरुषः, एकवचनम्। (D) सेव् धातुः, लोट्लकारः, प्रथम-पुरुषः, बहुवचनम्।

प्रश्न-12. ………. मासाः सन्ति।

(A) द्वादश: (B) द्वादश (C) द्वादशाः (D) द्विदश

प्रश्न-13. <u>हरिताः च ये तरवः (तेषाम्)</u> ललितलतानां माला रमणीया।

(A) हरिततरूणाम् (B) हरिताः तरवः (C) हरित तरवः (D) हरिततरवानाम्

प्रश्न-14. वयं भोजनम् <u>अखादम्</u>।

(A) अखादम् (B) अखादत (C) अखादाव (D) अखादाम

प्रश्न-15. अयोग्यः पुरुषः नास्ति, योजकः ... ... ... ... ... दुर्लभः।

(A) खलु (B) अत्र (C) एव (D) तत्र

प्रश्न-16. संस्कृते ... ... ... ... ... विभक्तयः सन्ति।

(A) त्रयः (B) सप्त (C) षड् (D) पञ्च

## खण्ड 'ख'

# अपठित-अवबोधनम्

प्रश्न-17. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानाम् उत्तराणि दीयन्ताम्।

विज्ञानस्य नवीनेषु आविष्कारेषु एकः अतीव उपयोगी आविष्कारः अस्ति- 'चलभाषियन्त्रम् (मोबाइल इति)। अस्य मुख्यं प्रयोजनमासीत् दूरवर्तिना केनापि जनेन सह वार्तालापः सुकरः भवेत् इति। परमद्यत्वे तु चलभाषियन्त्रं लघुसङ्गणकमिव वर्तते। एवं प्रतीयते यत् जनाः हस्ते एकं सम्पूर्णं जगत् एव नयन्तः गच्छन्ति। अनेन ते न केवलं वार्तां कुर्वन्ति, अपितु वार्तया सहैव वक्तारमपि साक्षात् पश्यन्ति। ईमेल-फेसबुक-व्हाट्सएप-माध्यमैः एतदतीव सुकरं संदेशवाहकमपि।

अस्य माध्यमेन गमनागमनार्थं शीघ्रमेव वाहनं प्राप्य जनाः सरलतया स्वगन्तव्यं प्राप्नुवन्ति। न केवलमेतदेव अपितु एतत् यन्त्रं मनोरञ्जनकारि अपि। बालाः, वृद्धाः युवानः अस्य माध्यमेन विविधक्रीडाभिः मनोरञ्जनक्षमाः भवन्ति। परमेतदपि विचारणीयं यदस्य अधिकाधिकप्रयोगः हानिकरः भवति। 'अति सर्वत्र वर्जयेत्' इत्यनुरूपेण अस्य यथावश्यकं प्रयोगः एव करणीयः।

(1) एकपदेन उत्तरत – 1×2=2

(क) किम् अतीव सुकरं सन्देशवाहकम्?

(ख) अस्य अधिकाधिकप्रयोगः कीदृशः भवति?

(2) पूर्णवाक्येन उत्तरत – 1×2=2

(क) चलभाषियन्त्रस्य मुख्यं प्रयोजनं किमासीत्?

(ख) अस्य प्रयोगेण के-के मनोरञ्जनक्षमाः भवन्ति?

(3) निर्देशानुसारं उत्तरत – 1×3=3

(क) 'लब्ध्वा' इत्यर्थे किं पदं गद्यांशेऽस्मिन् प्रयुक्तम्?

(ख) 'चलभाषियन्त्रं लघुसङ्गणकमिव वर्तते' इत्यत्र अव्ययपदम् किम्?

(ग) 'केनापि जनेन सह वार्तालापः सुकरः भवेत्' इत्यत्र विशेषणपदम् किम्?

(4) प्रदत्त-गद्यांशस्य उचितं शीर्षकं लिखत। 1×1=1

(5) उपरोक्त-गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिखत। 2×1=2

## खण्ड 'ग'

# रचनात्मक-कार्यम्

प्रश्न-18. जलसंरक्षणस्य महत्त्वं वर्णयतः मित्रस्य मित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखत। ½×10=5

| |
|---|
| देशस्य, प्रयतमानाः, अपव्ययम्, विचारयति, जागरूकता, प्रयासः, जानीमः, जीवनम्, सह, अस्तु। |

छात्रावासतः

दिनाङ्कः ७ मई, २०२६

प्रिय मित्र !

सप्रेम नमोनमः,

अत्र कुशलं तत्र (1) ... ... ... ... ...। भवतः पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् मित्रैः (2) ... ... ... ... ... जलसंरक्षणप्रचारकार्ये रतोऽस्ति। एषः तु उत्तमः (3) ... ... ... ... ... अस्ति। वयं सर्वे एव (4) ... ... ... ... ... यत् जीवने जलस्य महत्त्वं तु

अतुलनीयम्। जलम् एव (5) …………… इति वयं सर्वे जानीमः परं पुनरपि वयम् अस्य (6) …………… कुर्मः। अनेन आगामिकाले कियान् भीषणजलसङ्कटः भवेत् इति कोऽपि न (7) ……………। जलसंरक्षणार्थं (8) …………… अनिवार्या एव। यदि जनाः अत्र ध्यानं न दास्यन्ति तदा अस्माकं (9)…………… स्थितिरपि अफ्रीकादेशवत् भविष्यति। यथा ते जलबिन्दुप्राप्त्यर्थं (10) …………… सन्ति तथा एव अस्माकं देशस्य अपि स्थितिः भविष्यति। अतः जलसंरक्षणार्थं जागरूकता अनिवार्या। शेषं सर्वं कुशलम्। पितृभ्यां चरणयो: चरणवन्दना।

भवतः मित्रम्

उमेश:।

प्रश्न-19. अधोलिखितेषु विषयेषु एकं विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिख्यन्ताम्। 5×1=5

(क) पर्यावरण-प्रदूषणम् (ख) हिमाचल-प्रदेश: (ग) अस्माकं विद्यालय:

## खण्ड 'घ'

## अनुप्रयुक्त-व्याकरणम्

प्रश्न-20. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं लिखत। 1×5=5

(क) तस्य भार्या बुद्धि+मतुप्+ङीप् पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। (ख) सेवितव्य: महावृक्षः फलच्छायासमन्वितः

(ग) कश्चित् धूर्तः शृगालः हस्+शतृ आह। (घ) विश्वस्य आर्थिकी परिस्थिति: समीचीना नास्ति।

(ङ) पुत्रस्य दैन्यं दृश्+क्त्वा अहं रोदिमि।

प्रश्न-21. अधोलिखितानां कालबोधक-शब्दानां संस्कृत-पदेषु परिवर्तनं कुरुत। 1×3=3

(क) 12:00 (ख) 7:45 (ग) 4:30

प्रश्न-22. अधोलिखित-पदेषु त्रयाणां पदानां सन्धिपदं सन्धिविच्छेदपदं वा लिखत। 1×3=3

(क) जलद! सा+एव तवोत्तमा श्रीः। (ख) काकचेष्ट: विद्यार्थी एव आदर्शच्छात्रः मन्यते।

(ग) बहूनि+अपत्यानि मे सन्तीति सत्यम्। (घ) भ्रातरावावां सोदर्यौ।

प्रश्न-23. अधोलिखित-वाक्येषु त्रयाणां वाक्यानां वाच्यस्य नियमानुगुणं समुचितं वाच्य-परिवर्तनं कुरुत। 1×3=3

(क) माता ग्रन्थान् पठति। (ख) मुनिभिः पूजा क्रियते।

(ग) रमा लेखं लिखति। (घ) तया गीतानि गीयन्ते।

प्रश्न-24. अधोलिखित-पदेषु चतुर्पदानां समुचितं पद-परिचयं विधीयन्ताम्। ½×4=2

पित्रा, अस्माकम्, देवि!, घ्नन्ति, अक्रीडम्, तिष्ठेयुः।

प्रश्न-25. अधोलिखित-वाक्येषु लिङाधारित-सङ्ख्या-वाचक-पदानि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत। ½×4=2

(क) सरोवरे ………. कमले स्तः। (द्वे/द्वौ/द्वये)

(ख) तत्र ……….. ग्रन्थाः सन्ति। चत्वार:/चत्वारि/चत्वाराः)

(ग) ………. कन्याः कन्दुकेन क्रीडन्ति। (त्रयः/तिस्रः/त्रीणि)

(घ) ज्ञानेन्द्रियाणि ……….. भवन्ति। (पञ्चाः/पञ्च/ पञ्चमाः)

प्रश्न-26. अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहपदं वा प्रदत्त-विकल्पेभ्यः चिनुत। ½×4=2

(क) अहिंसा परमो धर्मः। (ख) सीता च रामः च वन्दनीयौ।

(ग) तत्र राजसिंहः नाम राजपुत्रः वसति स्म। (घ) कज्जलम् इव मलिनम् धूमं मुञ्चति शतशकटीयानम्।

प्रश्न-27. अधोलिखित-अशुद्ध-वाक्यानाम् अशुद्धि-संशोधनं कुरुत। ½×4=2

(क) वयम् कार्यं करोति। (ख) सा विद्यालयं गच्छसि।

(ग) ह्यः विद्यालये सम्मान-समारोह: भविष्यति। (घ) षड: ऋतवः सन्ति।

प्रश्न-28. मञ्जूषातः अव्यय-पदानि विचित्य रिक्तस्थानानि पूरयत। ½×4=2

| पुनः, एव, हि, तु |
|---|

(क) चौरः ... ... ... ... ... उच्चैः क्रोशितुमारभत। (ख)) वस्तुतः वनराजः भवितुं ... ... ... ... ... अहमेव योग्यः।

(ग) परेङ्गितज्ञानफला ... ... ... ... ... बुद्धयः। (घ) अहं ... ... ... ... ... पृच्छामि।

खण्ड 'ङ'

## पठित-अवबोधनम्

### पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्

प्रश्न-29. अधोलिखित-पठित-अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्न: समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(1) एकपदेन उत्तरत – 1×2=2

(क) निर्धनो जनः केन पीडितः आसीत्?

(ख) पिता कस्य रुग्णताम् आकर्ण्य व्याकुलो जातः?

(2) पूर्णवाक्येन उत्तरत – 1×1=1

(क) निर्धनो जनः कथं वित्तम् उपार्जितवान्?

(3) निर्देशानुसारं उत्तरत – 1×2=2

(क) "छात्रावासे" इत्यत्र का विभक्तिः?

(ख) 'कर्तुम्' इत्यत्र कः प्रत्ययः?

प्रश्न-30. अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् ।
वाष्पयानमाला संधावति वितरन्ती ध्वानम् ॥
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।
शुचि पर्यावरणम्॥

(1) एकपदेन उत्तरत – 1×2=2

(क) शतशकटीयानं किं मुञ्चति?

(ख) संसरणं कीदृशम् अभवत्?

(2) पूर्णवाक्येन उत्तरत – 1×1=1

(क) केषां पङ्क्तयः अनन्ताः सन्ति?

(3) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'त्यजति' इत्यर्थे अत्र प्रयुक्तं पदं किम्?

(ख) 'सरलम्' इति पदस्य प्रयुक्तं विलोमपदं किम्?

## पठित-गद्य-पद्ययोः रूपरेखा, प्रसङ्गसहितं हिन्दी-भाषायाम् अनुवादः।

प्रश्न-31. अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य रूपरेखा, प्रसङ्गसहितं हिन्दी-भाषायां सरलार्थं विधीयन्ताम्। (½+½+2=3)

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद - "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

अथवा

यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते। प्रकृतिसमक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माणं न करणीयम्। तटबन्धं निर्माय बृहन्मात्रं नदीजलमपि नैकस्मिन् स्थले पुञ्जीकरणीयम् अन्यथा असन्तुलनवशाद् भूकम्पस्सम्भवति। वस्तुतः शान्तानि एव पञ्चतत्त्वानि क्षितिजलपावकसमीरगगनानि भूतलस्य योगक्षेमाभ्यां कल्पन्ते। अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति।

प्रश्न-32. अधोलिखित-पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य रूपरेखा, प्रसङ्गसहितं हिन्दी-भाषायां सरलार्थं विधीयन्ताम्। (½+½+2=3)

उदीरितोऽर्थः पशुनापि गृह्यते,<br>
हयाश्च नागाश्च वहन्ति बोधिताः।<br>
अनुक्तमप्यूहति पण्डितो जनः,<br>
परेङ्गितज्ञानफला हि बुद्धयः॥

अथवा

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।<br>
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

प्रश्न-33. रेखाङ्कितपदमाधृत्य अधोलिखित-वाक्यानां प्रश्ननिर्माणं कुरुत। ½×4=2

(क) सर्वे <u>प्रकृतिमातरं</u> प्रणमन्ति।

(ख) <u>धेनूनाम्</u> माता सुरभिः आसीत्।

(ग) पुरा त्वया <u>मह्यं</u> व्याघ्रत्रयं दत्तम्।

(घ) <u>विमूढधीः</u> पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।

प्रश्न-34. अधोलिखितानां पदानाम् अर्थः कोष्ठकात् चित्वा लिखत- ½×4=2

| | |
|---|---|
| (क) जगाद | (अकथयत्, अगच्छत्) |
| (ख) ईक्षते | (पश्यति, इच्छति) |
| (ग) अत्तुम् | (खादितुम्, आविष्कर्तुम्) |
| (घ) ययौ | (याचितवान्, गतवान्) |

*******************************************************

**कक्षा दशमी**

**आदर्शप्रश्नपत्र-प्रारूप-रूपरेखा**

**HPBOSE DHARAMSHALA**

**शिक्षा-सत्र- 2026-2027**

**विषयः संस्कृतम्**

**समयः होरात्रयम्** **पूर्णांकाः 80**

---

**खण्डविभाजनम्**

| | | |
|---|---|---|
| खण्ड 'क' | "बहुविकल्पात्मक-प्रश्नाः" | 16 अङ्काः |
| खण्ड 'ख' | "अपठित-अवबोधनम्" | 10 अङ्काः |
| खण्ड 'ग' | "रचनात्मक-कार्यम्" | 10 अङ्काः |
| खण्ड 'घ' | "अनुप्रयुक्त-व्याकरणम्" | 24 अङ्काः |
| खण्ड 'ङ' | "पठित-अवबोधनम्" | 20 अङ्काः |
| | कुल-अङ्काः | 80 अङ्काः |

**खण्ड 'क'**

**बहुविकल्पात्मक-प्रश्नाः (1×16=16)**

**प्रथमतः षोडशपर्यन्तं बहुविकल्पात्मक-प्रश्नाः भविष्यन्ति, तत्रापि पञ्च प्रश्नाः "शेमुषी द्वितीयो भागः" इत्येतम् अधिकृत्य, दश प्रश्नाः व्याकरणम् अनुसृत्य तथा च एकं प्रश्नं संस्कृतस्य सामान्य- बिन्दूनां भविष्यति।**

**प्रश्न-1. "शेमुषी द्वितीयो भागः" इत्यस्य संस्कृत-पाठ्यपुस्तकस्य कस्यचिद् एकस्य पाठस्य नाम।**
**प्रश्न-2. "शेमुषी द्वितीयो भागः" इत्यस्य प्रथम-पाठतः पञ्चम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।**
**प्रश्न-3. "शेमुषी द्वितीयो भागः" इत्यस्य प्रथम-पाठतः पञ्चम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।**
**प्रश्न-4. "शेमुषी द्वितीयो भागः" इत्यस्य षष्ठ-पाठतः दशम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।**
**प्रश्न-5. "शेमुषी द्वितीयो भागः" इत्यस्य षष्ठ-पाठतः दशम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः एकः प्रश्नः।**
**प्रश्न-6. प्रकृति-प्रत्यययोः संयोजनं विभाजनं वा।**
**प्रश्न-7. कालबोधक-शब्दस्य संस्कृत-पद-परिवर्तनम्।**
**प्रश्न-8. सन्धिम्/सन्धिविच्छेदम् वा।**
**प्रश्न-9. वाच्यस्य नियमानुगुणं समुचितं वाच्य-परिवर्तनम्।**
**प्रश्न-10. शब्दानां पद-परिचयम्।**
**प्रश्न-11. धातूनां पद-परिचयम्।**
**प्रश्न-12. लिङाधारित-सङ्ख्या-वाचक-पदचयनम्।**
**प्रश्न-13. समस्तपदं विग्रहपदं वा चिनुत।**
**प्रश्न-14. अशुद्धि-संशोधनम्।**
**प्रश्न-15. अव्यय-पदस्य उपयोगः।**
**प्रश्न-16. सामान्य-संस्कृतस्य मूलभूत-परिचयात्मक-बिन्दूनां ज्ञानम् (लिङ्ग- विभक्ति- वचन- पुरुष- कारकादि)।**

**खण्ड 'ख'**

**अपठित-अवबोधनम्**

**(अपठित-सरलगद्यांश-आधारित-कार्यम् :- एकः गद्यांशः)**

**प्रश्न-17. 120-200 शब्द-परिमितः एकः अपठितः सरल-गद्यांशः (सरलकथा प्रसिद्ध-घटना वर्णनं वा)**

**(1) एकपदेन प्रश्नोत्तर-द्वयम्  1×2=2**

**(2) पूर्णवाक्येन प्रश्नोत्तर-द्वयम्  1×2=2**

**(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-त्रयम्)  1×3=3**

**(4) गद्यांशस्य समुचित-शीर्षकम्  1×1=1**

**(5) गद्यांशस्य तृतीयांश-तुल्यं सारम्। 2×1=2**

**भाषिक-कार्यम् =>**

**वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च।**

- **विशेषेण ध्यातव्यम्-**

**बोर्ड परीक्षायां अपठितगद्यांशः एव भविष्यति, यः कस्यापि सहायतापुस्तकेषु विद्यमानः (लिखितः) न स्यात्। एतत् परीक्षा-पत्र-निर्मातुः उत्तरदायित्वं वर्त्तते।**

**खण्ड 'ग'**

**रचनात्मक-कार्यम्**

**प्रश्न-18. सङ्केताधारित-अनौपचारिक-पत्रम्  ½×10=5**

**प्रश्न-19.निबन्ध-लेखनम् (अनुच्छेद-लेखनम्)  5×1=5**

**खण्ड 'घ'**

**अनुप्रयुक्त-व्याकरणम्**

**प्रश्न-20. प्रत्ययाः (पञ्च प्रकृति-प्रत्ययानां संयोजनम् / विभाजनञ्च)  1×5=5**

**(1) कृदन्ताः - तव्यत्, अनीयर्, शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्।**

**(2) तद्धिताः - मतुप्, इन्, ठक्, त्व, तल्।**

**(3) स्त्री-प्रत्ययौ - टाप्, ङीप्।**

**प्रश्न-21. त्रयाणां कालबोधक-शब्दानां संस्कृत-शब्देषु परिवर्तनम्।  1×3=3**

**(सामान्य-सपाद-सार्ध-पादोन)**

**प्रश्न-22. सन्धि-कार्यम् (त्रयाणां पदानां सन्धिं/सन्धि-विच्छेदं वा)  1×3=3**

**(1) स्वर-सन्धिः => दीर्घ, गुण, वृद्धि, यण्, अयादि, पूर्वरूप, पररूप, संयोग इत्यादयः।**

**(2) व्यञ्जन-सन्धिः => श्चुत्व, ष्टुत्व, जशत्व, तुक् आगम, अनुस्वार, परसवर्ण, अनुनासिक, वर्गीय-प्रथम-अक्षराणां तृतीयवर्णे पञ्चमवर्णे वा परिवर्तनम् इत्यादयः।**

**(3) विसर्ग-सन्धिः => विसर्गस्य स्थाने उत्त्वं, रत्वं, लोपः, शकारः, षकारः, सकारः च।**
**प्रश्न-23. वाच्य-परिवर्तनम् (केवलं लट्लकारे) 1×3=3**
**प्रश्न-24. पद-परिचयः (चतुर्णां शब्दानां धातूनाञ्च पद-परिचयः)। ½×4=2**
**प्रश्न-25. चतुर्णां लिङ्गाधारित - सङ्ख्या - वाचकपदानां चयनम् (एकतः द्वादश-पर्यन्तम्) ½×4=2**
**प्रश्न-26. समासाः (वाक्येषु चतुर्णां समस्त-पदानां विग्रहः विग्रह-पदानां च समासः) ½×4=2**
**(1) तत्पुरुषः (विभक्तिः, नञ्, उपपदः),**
**कर्मधारयः तत्पुरुषः (विशेषण- विशेष्यम्, उपमानउपमेयम्),**
**द्विगुः तत्पुरुषः च।**
**(2) द्वन्द्वः (इतरेतरः, समाहारः, एकशेषः)**
**(3) बहुव्रीहिः (समानाधिकरणम्)**
**(4) अव्ययीभावः (अनु, उप, सह, निर्, प्रति, यथा)**
**प्रश्न-27. चतुर्णां अशुद्ध-वाक्यानां संशोधनम्। ½×4=2**
**(वचन-लिङ्ग-पुरुष-विभक्ति-लकार-विशेषण- विशेष्याधारितम्)**
**प्रश्न-28. अव्यय-पदानि (वाक्येषु चतुर्णाम् अव्ययपदानां प्रयोगः) ½×4=2**
**अपि, इति, अलम्, इव, एव, एवम्, उच्चैः, नीचैः, कदा, एकदा, अधः, उपरि, समन्ततः, परितः, सर्वतः, कुतः, नूनम्, पुरा, मा, अत्र-तत्र, यत्र-कुत्र, यथा-तथा, यदा-तदा, यावत्-तावत्, यदि-तर्हि, कदापि, तथापि, खलु, ननु, किल, सह, इतस्ततः, यत्, विना, सहसा, अद्य, श्वः, ह्यः, अधुना, अन्तः, बहिः, वृथा, मिथ्या, किमर्थम्, शनैः-शनैः, पुनः-पुनः, भूयो-भूयः इत्यादयः।**

- **<u>विशेषेण ध्यातव्यम् (final paper setter)-</u>**

**परीक्षा-पत्र-निर्माता प्रश्न-20 तः प्रश्न-28 पर्यन्तं ये व्याकरण-सम्बन्धिताः प्रश्नाः सन्ति, तेषां प्रश्नानां निर्माणमपि "शेमुषी द्वितीयो भागः" इति पाठ्यपुस्तकात् एव कुर्यात्, येन पुस्तकस्य अपि महत्ता भवेत्।**

## खण्ड 'ङ'
## पठित-अवबोधनम्

**("शेमुषी-द्वितीयो भागः" इति संस्कृत-पाठ्यपुस्तकम् अधिकृत्य पठित-अवबोधनम्)**
**{पाठ्यसामग्री- प्रथमपाठतः दशमपाठ-पर्यन्तम्}**
**पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्**
**प्रश्न-29. 40-50 शब्द-परिमितः एकः पठित-गद्यांशः**
**(संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)**
**(1) एकपदेन प्रश्नोत्तरद्वयम् 1×2=2**
**(2) पूर्णवाक्येन एकं प्रश्नोत्तरम् 1×1=1**
**(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तरद्वयम्) 1×2=2**

**प्रश्न-30. एकः पठितः पद्यांशः (संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)**
**(1) एकपदेन प्रश्नोत्तरद्वयम् 1×2=2**
**(2) पूर्णवाक्येन एकं प्रश्नोत्तरम् 1×1=1**
**(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तरद्वयम्) 1×2=2**

**भाषिक-कार्यम् (प्रश्न-29 एवं प्रश्न-30 कृते)=>**

**वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च।**

## संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य हिन्दी-भाषायाम् अनुवादः।

**प्रश्न-31. एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः)** (½+½+**2=3)**

**प्रश्न-32. एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः)।** (½+½+**2=3)**

**प्रश्न-33. रेखाङ्कित-पदमधिकृत्य चतुर्णां वाक्यानां प्रश्ननिर्माणम्।** ½×**4=2**

**प्रश्न-34. संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्र्याः अभ्यासमधिकृत्य चतुर्णां पदानां मेलनम् । अभ्यासेषु एतादृशाः अनेके विषयाः सन्ति, तद्यथा-** ½×**4=2**

**> पर्यायपदानां (समानार्थक-पदानां) मेलनम्।**

**> विलोमपदानां (विपरीतार्थक-पदानां) मेलनम्।**

**> विशेषण-विशेष्यानां मेलनम्।**

**> कोष्ठकात् चित्वा पदानाम् अर्थः।**

**> शुद्ध-कथनानां समक्षम् "आम्" इति तथा अशुद्ध-कथनानां समक्षम् "न" इति लेखनम्।**

**> कोष्ठकात् शुद्धं विकल्पं विचित्य रिक्तस्थानपूर्तिः।**

**परीक्षा-पत्र-निर्माता एतेषु विषयेषु कमपि एकं विषयम् अधिकृत्य प्रश्नं प्रष्टुं शक्नोति।**

*************************************************************

# Format of Design (Language Subjects)

Question Paper / Test

**Subject:** संस्कृतम् (Sanskrit)

**Class:** दशमी (10th)

**Unit/Paper:** आदर्शप्रश्नपत्रम् (HPBOSE)

**Time:** 3 Hours

**Marks:** 80

## Weightage to Objectives

| Objective | Knowledge of language elements | Comprehension | Expression | Appreciation | Total |
|---|---|---|---|---|---|
| **Percentage of Marks** | 25.00% | 47.50% | 21.25% | 6.25% | 100% |
| **Marks** | **20** | **38** | **17** | **5** | **80** |

## Weightage to form of question:

| Forms of Questions | E / LA | SA | VSA | O (MCQ) | Total |
|---|---|---|---|---|---|
| **No. Of Questions** | 3 | 15 | 34 | 16 | 68 |
| **Marks allotted** | 10 | 29 | 25 | 16 | 80 |
| **Estimated time** | **35 Mins** | **65 Mins** | **55 Mins** | **25 Mins** | **180 Mins** |

## Weightage to Major Content Areas:

| S.No. | Unit / Sub-Units | Marks |
|---|---|---|
| 1. | खण्ड 'क' : बहुविकल्पात्मक-प्रश्नाः (MCQ) | 16 |
| 2. | खण्ड 'ख' : अपठित-अवबोधनम् (गद्यांश कार्य) | 10 |
| 3. | खण्ड 'ग' : रचनात्मक-कार्यम् (पत्र, लघुनिबन्ध) | 10 |
| 4. | खण्ड 'घ' : अनुप्रयुक्त-व्याकरणम् | 22 |
| 5. | खण्ड 'ङ' : पठित-अवबोधनम् (गद्यांश-पद्यांश बोध, अनुवाद आदि) | 22 |
| | **Total** | **80** |



Scanned with OKEN Scanner

**Schemes of Sections:** खण्ड 'क' से 'ङ' (पंच खण्डाः)

**Pattern of Options:** आन्तरिक चयनम् (Internal Choice in E / LA)

**Estimated difficulty level:** Difficult: 30% (%marks: 24) | Moderate: 35% (%marks: 28) | Easy: 35% (%marks: 28)

**Index of Abbreviations:** (E/LA: Essay/Long Answer; SA: Short Answer; VSA: Very Short Answer; O: Objective)



Scanned with OKEN Scanner

# 3. BLUE PRINT (LANGUAGE)

FORMAT OF BLUEPRINT (Language) | Subject: संस्कृतम् (Sanskrit) | Class: दशमी (10th) | Max Marks: 80 | Time: 3 Hours

| S. No. | Objective → Form of Questions → Content Unit / Sub Unit | Elements of Language | | | | Comprehension | | | | Expression | | | | Appreciation | | | | Total Row Wise |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | E | SA | VSA | O | E | SA | VSA | O | E | SA | VSA | O | E | SA | VSA | O | |
| 1 | खण्ड 'क' (MCQ) | - | - | - | - | - | - | - | 16(16) | - | - | - | - | - | - | - | - | **16 [16]** |
| 2 | खण्ड 'ख' (अपठित) | - | - | - | - | 3(1) | 2(2) | 5(4) | - | - | - | - | - | - | - | - | - | **10 [7]** |
| 3 | खण्ड 'ग' (रचनात्मक) | - | - | - | - | - | - | - | - | 5(1) | - | 5(10) | - | - | - | - | - | **10 [11]** |
| 4 | खण्ड 'घ' (व्याकरण) | - | 10(10) | 10(10) | - | - | - | - | - | - | 2(2) | - | - | - | - | - | - | **22 [22]** |
| 5 | खण्ड 'ङ' (पठित) | - | - | - | - | 3(1) | 15(11) | - | - | - | - | - | - | 3(1) | 2(4) | - | - | **22 [17]** |
| **Sub Total** | | **-** | **10(10)** | **10(10)** | **-** | **6(2)** | **17(13)** | **5(4)** | **16(16)** | **5(1)** | **2(2)** | **5(10)** | **-** | **3(1)** | **2(4)** | **-** | **-** | **QS: 68 (Marks: 80)** |
| **Total Column Wise** | | **(Marks Total) → 20** | | | | **(Marks Total) → 38** | | | | **(Marks Total) → 17** | | | | **(Marks Total) → 5** | | | | **80** |

**Summary:**

| | | |
|---|---|---|
| Essay (E) | No. 3 | Marks: 10 |
| Short Answer (SA) | No. 15 | Marks: 29 |
| Very Short Answer (VSA) | No. 34 | Marks: 25 |
| Objective (O) | No. 16 | Marks: 16 |

**Pattern of Options:** आन्तरिक चयनम् (Internal Choice)

**Scheme of Sections:** खण्ड 'क' से 'ङ' (पंच खण्डाः)

Notes: Figures within brackets to indicate the number of questions and figures outside the brackets to indicate marks. Denotes those marks have been combined to form one question.



Scanned with OKEN Scanner